# नव्यव्याकरणविषयस्य शास्त्रिस्तरीयः पाठ्यक्रमः

पाठ्यांशनाम - दीक्षिताभिमतसिद्धान्तकौमुदीव्याख्यानम्

पाठ्यांशसङ्केतः - न.व्या. ३०६

स्तरः - शास्त्री

वर्षम् - तृतीयम्

पत्रम् - षष्ठम्

व्याकरण-विषय-समितिः

नेपालसंस्कृतविश्वविद्यालयः

२०७९

CS CamScanner

# नव्यव्याकरणम्

पाठ्यांशनाम - दीक्षिताभिमतसिद्धान्तकौमुदीव्याख्यानम्
कक्षा - शास्त्री
वर्षः - तृतीयः
पत्रम् - षष्ठम्

पाठ्यांशसङ्केत - न.व्या. ३०६
पूर्णाङ्काः - ८०+२० = १००
वार्षिकपाठ्यभारः -१६० घण्टात्मकः
साप्ताहिकपाठ्यभारः - ६ (षट्)

## १. पाठ्यांशपरिचयः

अष्टाध्याय्याः समग्रसूत्राणां व्याख्यानभूता प्रक्रियानुसारिग्रन्थेषु प्रसिद्धतमा भट्टोजिदीक्षितस्य सिद्धान्तकौमुदी सर्वत्र संस्कृतशिक्षणालयेषु पाठ्यते । पूर्ववर्तिनां वैयाकरणानां भाष्यासम्मतमतखण्डनाय सिद्धान्तकौमुद्यामव्याख्यातानामुपयोगिविचाराणां प्रस्तुतये सिद्धान्तकौमुद्याष्टीकारूपेण दीक्षितेन प्रौढमनोरमा विरचिता । दीक्षितपश्चाद्वर्तिनां वैयाकरणानां मतखण्डनाय भट्टोजिदीक्षितपौत्रहरिदीक्षितेन शब्दरत्नं टीकारत्नं विरचितम् । स ग्रन्थो नेपालसंस्कृतविश्वविद्यालयेन त्रैवार्षिकस्नातकस्तरं चतुर्वर्षात्मके परिवर्त्य तदनुकूलविषयगतस्य पाठ्यक्रमस्य विकाशक्रमे नव्यव्याकरणस्य शास्त्रितृतीयवर्षस्य षष्ठपत्रस्य पाठ्यक्रमे स्थापितो वर्तते । पत्रेऽस्मिन् सशब्दरत्नप्रौढमनोरमायाः संज्ञाप्रकरणादजन्तनपुंसकलिङ्गान्तो भागः पाठ्यांशत्वेन निर्धारितोऽस्ति । पाठ्यांशं पञ्चसु प्रकरणेषु प्रविभज्य शिक्षणमूल्याङ्कनयोजना प्रस्तुता विद्यते । अनेन प्रकारेण प्रशिक्षिताश्छात्रा निर्धारितलक्ष्यप्राप्तये समर्था भविष्यन्तीति विश्वासो गृहीतो विद्यते । पाणिनीयव्याकरणेऽन्यमतखण्डनपुरस्सरं दीक्षिताभिमतसूत्रार्थ-व्याख्यानमस्मिन् पाठ्यांशे विद्यते । तेन हि सैद्धान्तिकपक्षस्य सम्यग्ज्ञानाय पाठ्यक्रमोऽयं बहूपयोगी स्यादिति विश्वासो वर्तते । अन्यमतविमर्शनेन सहैव स्वसिद्धान्तशिक्षणेन च छात्रेषु पाणिनीयव्याकरणस्य सुदृढं ज्ञानं भविता । स्वसिद्धान्तप्रदर्शनेन सहैवान्यमतखण्डनमपि अस्य पाठ्यक्रमस्य प्रमुखं लक्ष्यमस्ति । अन्यमतखण्डनपुरस्सरं स्वमतस्थापनपूर्वकमष्टाध्यायीस्थसूत्राणां व्याख्यानशिक्षणेन छात्रेषु स्वसिद्धान्तज्ञानेन साकं खण्डनमण्डनात्मिका तार्किकशक्तिरुत्पस्यत इत्यात्मसात्कृत्य परमतनिराकरणपूर्वकं स्वसिद्धान्ताभ्यासेन शिक्षणं फलोपधायकं भवेदिति पाठ्यक्रमस्य प्रमुखं साध्यम् । पर्यन्ते चोद्देश्यं केन्द्रीकृत्य निर्दिष्टसरण्या निर्दिष्टविषयवस्तूनां शिक्षणेन छात्रा दीक्षिताभिमतसूत्रार्थज्ञानवन्तो नव्यव्याकरणविषये परमतखण्डने योग्यतावन्तश्च भविष्यन्तीति विश्वस्यते ।

## २. पाठ्यांशस्य सामान्योद्देश्यानि

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधो निर्दिष्टेषु विषयेषु क्षमा भविष्यन्ति -

- रामचन्द्राचार्य-शेषकृष्णादिमतखण्डनपूर्वकं सूत्रार्थनिर्धारणे,
- अन्योन्याश्रयदोषपरिहारे कैयटादीनां मतान्तरप्रतिपादने,
- नाज्झलावित्यत्र दीर्घाकारप्लुताकारयोः प्रश्लेषफलप्रमाणविवृत्तौ,
- उदाहरणप्रत्युदाहरणपदकृत्येषु विशिष्टताप्रदर्शनपूर्वकं सूत्राणां निर्दुष्टार्थव्याख्याने,
- सूत्राणां नियम्यनियामकभावप्रदर्शनपूर्वकं तद्फलप्रमाणप्रदर्शने,
- पदप्रक्रियायां परिष्कारमूलायां फक्किकायाञ्च दीक्षितमतव्याख्याने,
- सूत्रविशेषाणां न्यासात्तरत्वस्य युक्तायुक्तत्वप्रतिपादने च ।

### ३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनञ्च

| प्रकरणानि | प्रकरणगतविशेष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | घण्टाः |
|---|---|---|---|---|
| क | अस्य विषयस्याध्ययनान्ते छात्रा अधो लिखितेषु विषयेषु नैपुण्यं समर्जयिष्यन्ति - वर्णसमाम्नाये द्विरूपात्तस्य हकारस्य प्रयोजनप्रतिपादने, "हलन्त्यम्" इति सूत्रे समापतितस्यान्योऽन्याश्रयदोषस्य परिहारप्रसङ्गे कैयटादिमतपर्यालोचने, "उपदेश आद्योच्चारणम्" इति सूत्रे उपदेशपदस्य भावघञन्तकरणघञयन्तत्वादौ सिद्धान्तमतस्थापने, "पूर्वत्रासिद्धम्" इति सूत्रे कार्यासिद्धत्वशास्त्रासिद्धत्वपक्षयोर्विश्लेषणपूर्वकं "भूवादयो धातवः" इत्यस्य सपदकृत्यमर्थापने च, "नाज्झलौ"इत्यत्र दीर्घप्लुताकारयोः प्रश्लेषे फलप्रमाणप्रदर्शने, दीक्षितमते "अणुदित्" इति सूत्रार्थ पर्यालोचने, परनित्येति० इति परिभाषाया उदाहरणमुखेन व्याख्याने च । | निर्धारितानि संज्ञापरिभाषा-विधायकसूत्राणि | २० | ३२ |
| ख | सशब्दरत्नम् "इको यणचि" इति सूत्रार्थ परिशीलने, "स्थानिवदादेशोऽनल्विधौ" इत्यस्यार्थापनप्रसङ्गेऽनलविधिपदार्थबोधने, "अचः परस्मिन्०" इत्यत्र समासनिरूपणपुरःसरमलविध्यर्थत्वसाधने, सोदाहरणं "न पदान्त०" इति सूत्रार्थपर्यालोचने च ।<br>"वान्तो यि प्रत्यये" इति सूत्रार्थापने,<br>"अवङ् स्फोटायनस्य" इति सूत्रार्थ विवेचने,<br>"ईदूदेद्द्विवचनं प्रगृह्यम्" इत्यस्यार्थापनपूर्वकमुदाहरणप्रदर्शने,<br>"अदसो मात्" इति सूत्रार्थापने, मात्ग्रहणस्य प्रयोजननिरूपणे च, सम्बुद्धाविति सूत्रार्थापने सम्बुद्धिग्रहणस्य प्रयोजनप्रतिपादने च । | निर्धारितानि "इको यणचि" इति सूत्रात् "सम्बुद्धौ०"इति यावत् सूत्राणाणि | २० | ३२ |
| ग | "स्तोः श्चुना श्चुः" इति सूत्रार्थापने स्थान्यादेशयोर्निधारणे, "ङमो ह्रस्वादचि ङमुण्नित्यम्" इत्यस्यार्थापने, मूलशब्दरत्नाभ्यां नित्यग्रहणस्य सार्थक्यप्रतिपादने, सिद्धान्ते परमदण्डिनौ इत्यत्र पक्षविपक्षाभ्यां नुड्वारणोपायविमर्शे च, "इदुदुपधस्य | निर्धारितानि "स्तोः श्चुना श्चुः" इति सूत्रात् "ढ्लोपे पूर्वस्य०" इति यावत् सूत्राणि । | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | चाप्रत्ययस्य" इति सूत्रार्थविश्लेषणे, "भोभगो अघोअ पूर्वस्ये"त्यत्राशग्रहणस्य प्रयोजनोपपादने च । | | | |
| घ | "अर्थवदधातु:०" इति सपदकृत्ये सूत्रार्थापनेऽत्रत्यार्थवत्वपरिष्कारे, "कृत्तद्धितसमासाश्च" इतिसूत्रे समासग्रहणस्य सार्थक्यप्रतिपादने, "सरूपाणामेकशेष०" इति सूत्रार्थापनेऽत्रत्य एवकारापकर्षस्य फलप्रमाणनिरूपणे, "अट्कुप्वाङ्नुम्व्यवायेऽपि" इतिसूत्रार्थापनपूर्वकम् "आदर्शेन" इत्यत्र णत्ववारणोपायनिरूपणे, सर्वादीनिसर्वनामानि इति सूत्रार्थापनपूर्वकं तद्गुणविज्ञानातद्गुणविज्ञानविवृतौ, उभयशब्दस्य सर्वादिगणे पाठप्रयोजननिरूपणे, "रषाभ्यां णो न:०" इति सूत्रे समानपदत्वनिर्वचने सङ्घटने च । | निर्धारितानि "अर्थवदधातु:०" इति सूत्रात् "अनङ् सौ" इति यावत् सूत्राणि । | २० | ३२ |
| ङ | "हल्ङ्याब्भ्यो दीर्घात्०" इति सूत्रार्थापनप्रसङ्गे तत्र प्रथमहल्ग्रहणस्य सार्थक्यनिरूपणे, "प्रत्ययलोपे प्रत्ययलक्षणम्" इत्यस्य विवेचने, "यू स्त्र्याख्यौ नदी" इति सूत्रस्यार्थापनपूर्वकं नित्यस्त्रीत्वपरिष्करणे, "तृज्वत् क्रोष्टु:" इति सूत्रार्थापनप्रसङ्गेऽतिदेशप्रकारपरिगणने, "सर्वनाम्न: स्याड्ढ्रस्वश्च" इति सूत्रार्थापनेऽसुड् कर्तव्यो न वेति विवेचने, "अतोऽम्" इत्यत्र अम् इतिच्छेदो म् इति वेति विश्लेषणे, "अस्थिदधि०" इति सूत्रार्थापने तदुदाहरणसङ्गमने च । | निर्धारितानि हल्ङ्यादिसूत्रादजन्त-नपुंसकलिङ्गान्तसूत्राणि | २० | ३२ |

४. पाठ्यवस्तुविवरणम्

**क प्रकरणे-**

प्रौढमनोरमाया: शब्दरत्नस्य च मङ्गलाचरणपद्यार्थनिरूपणम्, मङ्गलाचरणपद्यस्थगुरोरित्येकवचनस्य तात्पर्यबोधनम्, प्रौढमनोरमाशब्दस्य व्युत्पत्तिबोधनम्, प्रौढत्वस्य निर्वचनम्, "हयवरट्" इति सूत्रस्थस्य हकारस्य फलनिरूपणम्, "हल्" इति सूत्रस्थस्य हकारस्य फलप्रदर्शनम्, अन्योऽन्याश्रयदोषनिवारणाय कृतावृत्तिकस्य "हलन्त्यम्" इति सूत्रस्य विग्रहचिन्तनम्, तन्त्रावृत्त्येकशेषन्यतमेन हल् च ल् च इति विग्रहेण वा सूत्रावृत्तेरनावश्यकत्वमाशङ्क्य दीक्षितरीत्या तत्खण्डननिरूपणम्, "हलन्त्यम्" इत्यत्रापि "आद्यन्तौ टकितौ" इतिवद् द्वन्द्वसाधुत्वमाशङ्क्य तत्खण्डने हरिदीक्षितविचारस्य प्रदर्शनम् । "आदिरन्त्येन सहेता" इति सूत्रार्थविचार:, अत्रत्यशब्दरत्नानुशीलनम्, "उपदेश आद्योच्चारणम्" इति सूत्रे उपदेशपदस्य करणघञन्तत्वनिराकरणकारणानामनुशीलनम् । धातुसूत्रगणोणादीति प्रक्रियाकौमुदीस्थोपदेशपदार्थ- बोधकश्लोकानुशीलनम्, उपदेशशब्दस्य तद्बोधकत्वे प्रक्रियाकौमुदीकार-तद्व्याख्याकृन्मतखण्डनानुशीलनम्, "उपदेशेऽजनुनासिक

इत्" इत्यस्यार्थापनपूर्वकं तत्रत्योपदेशपदसार्थक्येमूलशब्दुत्नोक्त्यवधारणम्, प्रत्यहारशब्दस्यव्युत्पत्तिबोधनम्, तत्र योगरूढित्वनिर्धारणम्, सोहापोहंप्रत्यहाराणां संख्याया निर्धारणम्, "ऊकालोऽज्झ्रस्वदीर्घप्लुतः" इत्यस्यार्थापनपूर्वकं तत्र समाहारद्वन्द्व इतरेतररद्वन्द्वो वेति निर्धारणम्, "तस्यादित उदात्त" इत्यत्र अर्धह्रस्वशब्दस्य व्युत्पत्तिविचारः, तत्र ह्रस्वग्रहणस्यातन्त्रत्वसाधनम्, "तुल्यास्य प्रयत्नं सवर्णम्"इत्यस्यार्थापनम्, तत्पदकृत्यविचारश्च, "पूर्वत्रासिद्धम्" इत्यस्याधिकारसूत्रत्वप्रतिपादनम्, अत्र कार्यासिद्धत्वं शास्त्रासिद्धत्वं वेति विकल्प्य शास्त्रासिद्धत्वसंस्थापनम्, "नाज्झलौ" इत्यत्र दीर्घप्लुताकारयोः प्रश्लेषस्य फलप्रमाणानुशीलनम्, "अणुदित्०" इति सूत्रेऽण्प्रत्यहारः परणकारं यावदित्यत्र हरिदीक्षितोक्तफलप्रमाणानुशीलनम्, "भूवादयो धातवः" इत्यस्यार्थापनप्रकारनिरूपणम्, तत्र क्रियावाचिग्रहणस्य धातुग्रहणस्य च सशब्दरत्नं फलनिरूपणम्, "इको गुणवृद्धी" इति सूत्रार्थापनप्रकारानुशीलनम्, इक एव स्थाने स्तः, इति प्राचीनाभिमतस्य नियामकत्वस्य खण्डनम्, "ओर्गुणः" इत्यादावस्याप्रवृत्तौ शब्दरत्नोक्तवाचो युक्त्यवधारणम्, "मिदचोऽन्त्यात् परः" इत्यस्यार्थापनपूर्वकं प्रक्रियाकारोक्तार्थस्य निरसनम्, फलप्रदर्शनपूर्वकमितोऽवयविनिर्धारणम्, अत्र प्राचीनोक्तार्थस्य युक्तत्वमाशङ्क्य शब्दरत्नोक्तदिशा तत्खण्डनम्, "तस्मिन्निति निर्दिष्टे पूर्वस्य" "तस्मादित्युत्तरस्य" इति सूत्रद्वयानुशीलनम्, "अनेकाल्शित्सर्वस्य" इत्यस्य सोदाहरणमर्थापनम्, "परनित्येति०" परिभाषाया उदाहरणानां विवेकः, अत्रापवादस्यापि अन्तरङ्गेण बाधप्रकारप्रदर्शनम्, "अकृतव्यूहाः पाणिनीयाः" इत्यस्याः परिभाषाया दीक्षितदिशा सार्थक्यं प्रदर्श्य हरिदीक्षितोक्तदिशा तस्या निष्फलत्वप्रदर्शनम् ।

**ख प्रकरणे -**

"इको यणचि" इत्यत्र प्रत्याहारग्रहणेषु तद्वाच्यवाच्ये निरूढा लक्षणा, इत्यस्य सशब्दरत्नस्यानुशीलनम्, अत्र यथासंख्येन, स्थानेऽन्तरतमः, इत्यनेन वा निर्वाह इति निर्धारणम्, अस्य शब्दरत्नोक्तदिशा "अणुदित् सवर्णस्य चाप्रत्ययस्य" इति सूत्रवैयर्थ्यमाशङ्क्य तत्सार्थकप्रदर्शनम्, अज्झलादिप्रत्याहारेषु जातिपक्षस्यावश्यकत्वप्रतिपादनम्, तत्र पक्षे यथासंख्येनाप्यत्र निर्वाह इति निरूपणम्, "अनचि च" इति सूत्रार्थापने वाग्रहणानुवृत्तेः फलप्रमाणानुशीलनम्, एवं व्याख्याने "दीर्घादाचार्याणाम्" इत्यत्राचार्यग्रहणस्य पूजार्थत्वेऽपि न दोष इति सविशदव्याख्यानम्, "स्थानिवदादेशोऽनल्विधौ" इत्यस्यार्थापनप्रसङ्गे प्रक्रियाकौमुदीकारस्य सोपापोहं खण्डनम्, दीक्षितोक्तार्थस्योल्लेखश्च, अनल्विधावित्यत्र विधिग्रहणसार्थक्यचिन्तनम्, अल् च इहस्थान्यवयव एव गृह्यते, इत्यस्य विवेकः । "अचः परस्मिन्०"इत्यस्याल्विध्यर्थत्वे उदाहरणप्रदर्शनम्, अस्य पूर्वसूत्राद् वैलक्षण्यप्रतिपादनम्, अत्र पूर्वत्वस्याविधिनिर्धारणम्, "न पदान्त०" सूत्रे विधिशब्दस्य कर्मसाधनत्वं भावसाधनत्वं वेति सफलनिर्धारणम्, अस्य सूत्रस्योदाहरणानां विवेकः, अस्योदाहरणप्रसङ्गे सवर्णानुस्वारयोः शिण्ढि इत्यस्य शब्दरत्नानुशीलनम्, धात्रंश इत्यत्र द्वित्वं भवति न वेति विचारः, "वान्तो यि प्रत्यये" इति सूत्रार्थापनम् "एत्येधत्यूठ्सु" इत्यत्र एतीति कस्य विशेषणमित्यत्र भट्टोजिदीक्षितकैयटमाधवानां मतविवेचनम्, "अन्तादिवच्च" इत्यस्यार्थापन -मुदाहरणप्रदर्शनञ्च, स्थानिवत् सूत्रेणौवास्य गतार्थत्वचिन्तनम्, श्रौतानुमानिकस्थान्यादेशाभावेऽपि न दोष इति फलप्रतिपादनम्, "अवङ् स्फोटायनस्य" अस्याप्यनल्विधावनिष्टत्वसाधने फलप्रमाणावधारणाम्, अस्य गवीति इत्यस्यार्थापनम्, अत्र अगिति सूत्रयितुमुचितमित्यस्य सशब्दरत्नं प्रतिपादनम्, "ईदूदेद्द्विवचनं प्रहृत्यम्" इत्यस्यार्थापनविचारः, गवे, इति वा प्रत्युदाहरणमिति निर्धारणम्,

उदाहरणसङ्घटनञ्च, अस्य द्विवचनान्तं प्रगृह्यं स्यादित्यर्थस्य निरसनम्, "अदसो मात्" इति सूत्रार्थापनम्, अत्र एकारो नानुवर्तते इत्यत्र हेतुप्रदर्शनम्, अस्य सूत्रस्य रामकृष्णावमू आसते, इति उदाहरणदानस्य हेतुदर्शनम्, प्रकृतसूत्रं प्रति मूत्वमीत्वेनासिद्धे आरम्भसामर्थ्याद् इति प्रतीकस्य शब्दरत्नानुशीलनम्, "निपात एकाजनाङ्" इत्यत्र एकाच्पदे समासनिर्धारणम्, अत्र निपातपदसार्थक्यविचारः, कुत्र कुत्रार्थे आङ् ङिद्भवति, कुत्र च नेति विवेचनम्, "सम्बुद्धौ०" सूत्रार्थापनम्, तत्र ऋषिशब्दार्थबोधः, तत्र सूत्रे सम्बुद्धिग्रहणस्य भट्टोजिदीक्षितदिशा सार्थ्यक्यप्रदर्शन्, हरिदीक्षितदिशा तन्मूललापनम्, तन्मते सम्बुद्धिग्रहणस्य फलान्तरप्रदर्शनम् ।

**ग प्रकरणे -**

"स्तोः श्चुना श्चुः" इत्यत्र समाहारद्वन्द्वप्रतिपादनम्, तत्र सौत्रपुंस्त्वविधाने लाघवप्रदर्शनम्, अत्र स्थानिवदादेशयोर्यथासंख्यत्वप्रतिपादनम्, न तु निमित्तकार्यिणोरिति निर्धारणम्, अत्र स्तोः श्चुना श्चुः इति वचनस्य सुवचत्वप्रतिपादनम्, "ष्टुना ष्टुः" इत्यत्रापि कार्यिनिमित्तयोर्यथासंख्यत्वेनेति प्रतिपादनम्, ष्टौष्टुः इत्यस्य सुवचत्वप्रतिपादनम्, "शश्छोऽटि" इति सूत्रार्थापनम्, तच्छिव इति हल्सन्धिप्रयोगप्रक्रियायां प्राचीनमतनिरासश्च, "ङः सि धुट्" इति सूत्रार्थापनम्, तदुदाहरणसाधनम्, तत्र तकारस्य थत्वकरणनिरासे प्रमाणप्रदर्शनम्, अत्र प्रक्रियालाघवार्थं तुट् च कर्तुं योग्य इति प्रतिपादनम्, "शि तुक्" इति सूत्रार्थापनम्, उदाहरणप्रदर्शनञ्च, अत्र धेटः करणीयत्वस्य निरासः, सिद्धान्ते कुर्वञ्छेते इत्यादिप्रयोगे णत्वनिषेधानापत्तिवारणम्, "ङमो ह्रस्वादचि ङमुण्नित्यम्" इत्यस्यार्थापनम्, मूलशब्दरत्नाभ्यां नित्यग्रहणस्य स्पष्टार्थत्वप्रतिपादनम्, सिद्धान्ते परमदण्डिनौ इत्यत्र पक्षविपक्षाभ्यां नुड्वारणोपायचिन्तनम्, अत्र ङमो ह्रस्वादचि द्वे इति सूत्रयितुं शक्यते न वेति विचारः । "इदुदुपधस्य चाप्रत्ययस्य" इत्यस्यार्थापनप्रसङ्गे इदुदुपधस्येत्यत्र वैयाधिकरण्यं प्रत्ययस्य इत्यस्य तु सामानाधिकरण्यमितिप्रतिपादनपुरःसरं दीक्षितोक्तव्याख्यानस्य शब्दरत्नकर्तृकखण्डननिरूपणम्, "ससजुषो रुः" इत्यस्यार्थापनम्, ग्रहणवतेत्यस्य प्रत्ययविधिविषयत्वप्रतिपादनम्, व्यपदेशिवद्भावोऽप्रातिपदिकेनेत्यस्य शब्दरत्नानुसारेण प्रत्याख्यातत्वप्रतिपादनम्, "भोभगो अघोअ पूर्वस्य" इत्यत्र असन्धित्वप्रतिपादनम्, अत्रत्याश्ग्रहणस्य मूलशब्दरत्नानुसारेणैव सार्थक्यप्रदर्शनम्, विभाषा धवद्भगवद् इति वार्तिकस्यार्थोदाहरणप्रदर्शनम्, अस्यावश्यकत्वानावश्यकत्वनिश्चयनम्, "हलि सर्वेषाम्" इत्यस्यार्थापनम्, अत्र अशोऽनुवृत्तिरावश्यकी न वेति विचारः, "ढ्रलोपे पूर्वस्य०" इयस्यार्थापनम्, उदाहरणप्रदर्शनञ्च, तृढो वृढ इति प्रत्युदाहरणस्य सिद्धिप्रतिपादनम्, दृढ इत्यस्य प्राचीनोक्तस्य प्रत्युदाहरणत्वनिरासः हे हरे वेदं निपातनमिति प्रक्रियाकौमुदीव्यख्यातुर्निरसनञ्च ।

**घ प्रकरणे -**

"अर्थवदधातुः०" इति सूत्रार्थापनम्, प्रत्ययान्तस्य पर्युदासे प्रमाणप्रदर्शनम्, प्रत्ययपदस्य पर्युदासे फलप्रमाणनिरूपणम्, अर्थवद्ग्रहणस्य मूलशब्दरत्नोक्तदिशा सार्थक्यनिरूपणम्, पर्युदासस्यार्थवत्वबोधकत्वमबोधकत्वं वेति सोदाहरणं प्रतिपादनम्, अधातुरित्यस्य मूलशब्दरत्नोक्तदिशा सार्थक्यचिन्तनम्, अप्रत्ययः, इत्यस्य अप्रत्ययान्त इत्यस्य च कृत्यप्रदर्शनम्, प्रत्ययपर्युदासोऽत्र न कर्तव्य इति स्वीकुर्वतां मतमनूद्य खण्डनम्, व्युत्पत्तिपक्षेऽपि बहुपटव इत्यादीनां सिद्धये सूत्रमिदमिति प्रतिपादनम्, "कृत्तद्धितसमासाश्च" इत्यस्यार्थपनमुदाहरणप्रदानञ्च, समासग्रहणस्य पक्षविपक्षाभ्यां सार्थक्यचिन्तनम्, परममूलोक्ते समासग्रहणस्य नियमकारेऽरुचिं प्रदर्श्य नियमाकारान्तरप्रदर्शनं तत्र प्रमाणोपन्यासश्च,

मीमांसकानां नैयायिकानाञ्च मतेऽपि नियमाकारस्यावश्यकत्वप्रदर्शनम्, "अट्कुप्वाङ्नुम्व्यवायेऽपि" इत्यस्यार्थापनम्, आदर्शेन इत्यत्र मूलशब्दरत्नोक्तदिशा णत्ववारणप्रातिपादनम्, अत्रत्यनुम्ग्रहणस्य सार्थक्यप्रतिपादनम्, "सरूपाणामेकशेष०" इति सूत्रार्थापनम्, विभक्तिनिमित्तकोऽयमेक -शेषोऽनिमित्तिको वेति निश्चायनम्, अत्र एवकारापकर्षस्य फलप्रमाणनिरूपणम्, अस्य सहविवक्षायामेव प्रवृत्तिरितिप्रतिपादनम्, राम राम औ इति स्थिते एकशेष इति प्राचां मतस्य खण्डनम्, सविभक्तिकानामेकशेष इत्यस्य खण्डनम्, युगपदधिकरणवचनतायां द्विवचनबहुवचनान्तानामेकशेष इत्यस्य खण्डनम्, जातिव्यक्तिपक्षद्वयेऽपि प्रकृतसूत्रस्यावश्यकत्वप्रदर्शनम्, "ङ्याप्प्रातिपदिकात्" इत्यत्र ङ्याब्ग्रहणस्य सार्थक्यचिन्तनम्, सिद्धान्ते बहुगोमत्केति न सिद्धेदित्याशङ्कानिरासश्च । "आदेशप्रत्यययोः" इत्यस्यार्थापनम्, आदेशवाक्ये गृहीते, प्रत्ययो यः सकार इत्यर्थकरणे च दोषदर्शनम्, दधिसेच इत्यादिवद् रामेषु इत्यादावपि षत्वनिषेधापत्तिवारणोपायस्य मूलशब्दरत्नोक्तस्यानुशीलनम्, उभशब्दस्य सर्वादिगणे पाठप्रयोजनचिन्तनम्, समतभेदं "न बहुव्रीहौ" इत्यस्य प्रौढमनोरमानुशीलनम्, "अल्लोपोऽनः" इत्यत्र प्रक्रियाकौमुदीकारस्य तद्व्याख्यातुश्च मतखण्डनम्, दिक्षीतमतेन सूत्रार्थनिर्धारणम्, "रषाभ्यां णो नः०" इति सूत्रस्यार्थापनम्, तत्र समानपदत्वनिर्वचनम्, शब्दरत्नोक्तदिशा सङ्घटनञ्च । "अच्च घेः" इति सूत्रार्थापनम्, प्रकृतसूत्रे ङित्करणस्य मतभेदेन सार्थक्यचिन्तनम्, "अनङ् सौ" इत्यत्र सोर्डा इति सूत्रयितुं शक्यते न वेति विचारश्च।

**ङ प्रकरणे -**

"हल्ङ्याब्भ्यो दीर्घात्०" इति सूत्रार्थापनम्, तत्र विहितविशेषणत्वे दोषप्रदर्शनम्, अत्रैव दीर्घग्रहणस्य प्रथमहल्ग्रहणस्य च सविशदं सार्थक्यचिन्तनम्, "षड्भ्यो लुक्" इत्यत्र बहुवचननिर्देशस्य प्राचीनमतेन सार्थक्यविचारः, तस्य शब्दरत्नकृन्मतेन सार्थक्यनिरूपणञ्च, "प्रत्ययलोपे प्रत्ययलक्षणम्" इत्यस्य नियामकत्वप्रदर्शनम्, नियमाकारप्रदर्शनम्, तत्फलसङ्घटनञ्च, "यू स्त्र्याख्यौ नदी" इति सूत्रस्य पक्षद्वयेऽप्यर्थापनम्, वर्णसंज्ञापक्षे ङ्यादीनां स्त्रीवाचकत्वरीतिप्रदर्शनम्, अत्र सूत्रे प्रथमलिङ्गग्रहणञ्चेति वार्तिकस्य सामान्यतया प्रवृत्तिस्थलप्रदर्शनम्, शब्दरत्नदिशा तदनावश्यकत्वप्रदर्शनञ्च, "तृज्वत् क्रोष्टुः" इत्यस्य नियामकत्वप्रदर्शनम्, अस्य रूपातिदेशप्रतिपादकत्वविचारः, शब्दरत्नोक्तदिशा अस्य अन्यातिदेशत्वाभावविवेचनम्, गोतोणिदिति वाच्यम्, इत्यस्य वाच्यत्वे फलप्रदर्शनम् , अत्र गोशब्देन औणादिकेन सादृश्याद् गोशब्द एव लक्ष्यते इत्यस्य खण्डनानुशीलनम् । "सर्वनाम्नः स्याड्ढ्रस्वश्च" इत्यस्यार्थकरणं दीर्घोच्चारणस्य फलप्रदर्शनञ्च, अत्र सर्वनाम्नोऽसुङ् चेति न्यासस्यावश्यकत्वप्रदर्शनम्, तत्खण्डनञ्च, अत्र विषये शब्दरत्नकारमतानुशीलनम्, "अम्बार्थनद्योर्ह्रस्वः" इत्यस्य मतभेदेनार्थापनम्, हे गार्गीमातः इत्यत्र मतभेदेन प्रक्रियाविचारः, अत्रैव सूत्रे अतिखट्वायेत्यत्र याटोऽभावविचारः, "ङिति ह्रस्वश्च" इत्यस्य पक्षभेदेनार्थविचारः, उदाहरणसमन्वयञ्च, अत्र कैयटहरदत्तमतेन नित्वस्त्रीत्वविचारः, फलभेदप्रदर्शनञ्च, "त्रिचतुरो स्त्रियां तिसृचतसृ" इत्यत्र स्त्रियामिति त्रिचतुरोविशेषणान्नेह, इत्यस्य सोदाहरणं सङ्घटनम्, "अतोऽम्" इत्यत्र अमोऽम्विधानस्य फलप्रदर्शनम्, अत्र अम् इतिच्छेदो म् इति वेति विचारः, "ह्रस्वनपुंसके प्रातिपदिकस्य" इति सूत्रार्थकरणम्, तत्फलप्रदर्शनञ्च, प्रातिपदिकस्याच इत्यर्थकरणे दोषप्रदर्शनम्, "अस्थिदधि०" ति सूत्रार्थापनम्, अतिदध्ना इत्यत्र तत्प्रतिपत्तिदर्शनम्, प्रियदध्ना इति रूपं भवति न वेति विचारः स्त्रियां प्रियदध्ना इति भवति ? प्रियदध्नेति वेति विचारश्च ।

## ५. शिक्षणविधयः क्रियाकलापाश्च

अस्य पाठ्यांशस्य शिक्षणे संस्कृते बहुप्रचलिता निगमनागमव्याख्यानप्रवचनविमर्शनप्रश्नोत्तरात्मिकाद्याः पद्धतय एव आवश्यकतानुसारेण यथायथमवलम्बनीया भवन्ति । कक्षायां शिक्षकेण सह छात्रानपि सक्रियान् विधाय विषयवस्तुबोधाय, विषयविश्लेषणाय, परमतखण्डनाय स्वमतस्थापनाय, व्याख्यानाय, प्रश्नोत्तरदानाय च छात्राः समुत्प्रेरणीयाः । यथायथं शिक्षणोपकरणानां प्रयोगं विधाय शिक्षणप्रक्रियायां सारल्यमानेतव्यम् । आवश्यकतामाकलैय्य समये समये विश्वविद्यालयो दूरशिक्षणपद्धते प्रयोगाय योजनामग्रेसारयितुं शक्नोतीति तस्य कृते वैद्युतोपकरणानां प्रयोगोऽपि समपेक्ष्यते ।

## ६. मूल्याङ्कनम्

पाठ्यक्रमममुमधीयानानां छात्राणां मूल्याङ्कनं द्विविधया पद्धत्या विधास्यते । तत्र च विंशत्यङ्कानामान्तरं मूल्याङ्कनं नेपाल-संस्कृत-विश्वविद्यालय-परीक्षा-नियन्त्रण-कार्यालयद्वारा प्रकाशितान्तरमूल्याङ्कन-विध्यनुसारेण भविष्यति चेद् अशीत्यङ्कानां मूल्याङ्कनं वार्षिकलेखपरीक्षामाध्यमेन भविष्यति ।

### (क) आन्तरिकमूल्याङ्कयोजना-

| शीर्षकम् | अङ्काः |
|---|---|
| उपस्थितिः | ३ |
| कक्षाकार्यकलापः | ३ |
| प्रतिवेदनलेखनम्/ परियोजनाकार्यञ्च | ६ |
| आन्तरिकी परीक्षा | ८ |
| योगः | २० |

### (ख) बाह्यमूल्याङ्कनयोजना-

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| क,ख,ग,घ,ङ | | प्रष्टव्याः | समाधेयाः | |
| क,ख,ग,घ,ङ | वस्तुगताः | ८ | ८ | ८×१ = ८ |
| क,ख,ग,घ,ङ | सङ्क्षिप्तात्मकाः | ९ | ६ | ६×६ = ३६ |
| क,ख,ग,घ,ङ | व्याख्यानात्मकाः | ३ | २ | २×८ = १६ |
| क,ख,ग,घ,ङ | विवेचनात्मकाः | ३ | २ | २×१० = २० |
| | | २३ | १८ | ८० |

७. पाठ्यसूची

(क) **पाठ्यग्रन्थः**

१. भट्टोजिदीक्षितः, प्रौढमनोरमा - शब्दरत्नसहिता (निर्धारितांशः)

**(ख) सहायकग्रन्थाः**

१. भट्टोजिदीक्षितः, सिद्धान्तकौमुदी-बालमनोरमा (वासुदेवदीक्षितः) सहित तत्त्वबोधिनी (ज्ञानेन्द्र-सरस्वती) टीका सं. गिरिधरशर्मा, परमेश्वरानन्द शर्मा, मोतीलाल, बनारसीदास, वाराणसी, सन् २०१२ ।

२. रामचन्द्राचार्यः,प्रक्रियाकौमुदी - प्रक्रियाप्रकाशसहिता ।

३. सोमनाथसिग्द्यालः, प्रतिसंस्कृता सिद्धान्तकौमुदी, काष्ठमण्डपः, नेपाल-राजकीय-प्रज्ञा-प्रतिष्ठानम्, वि.सं. २०१५ ।

# विशिष्टीकरण-तालिका

| प्रकरणम् | विवेचनात्मका: | | | व्याख्यानात्मका: | | | संक्षिप्तोत्तरात्मका: | | | वस्तुगता: | पूर्णाङ्का: |
|---|---|---|---|---|---|---|---|---|---|---|---|
| | प्रष्टव्या: प्रश्ना: | समाधेया: प्रश्ना: | | प्रष्टव्या: प्रश्ना: | समाधेया: प्रश्ना: | | प्रष्टव्या: प्रश्ना: | समाधेया: प्रश्ना: | | समाधेया: प्रश्ना: | अङ्का: |
| क | २ | १ | १० | - | - | - | १ | १ | ६ | | १६ |
| ख | - | - | - | १ | १ | ८×१=८ | १ | १ | ६ | २ | १६ |
| ग | १ | १ | १० | - | - | - | २ | १ | ६ | | १६ |
| घ | - | - | - | २ | १ | ८×१=८ | २ | १ | ६ | २ | १६ |
| ङ | - | - | | - | - | | ३ | २ | ६×२=१२ | ४ | १६ |
| योग: | ३ | २ | २० | ३ | २ | १६ | ९ | ६ | ३६ | ८ | ८० |

# आदर्शप्रश्नपत्रम्

कक्षा - शास्त्री
वर्षः - तृतीयः

विषयः - नव्यव्याकरणम्
पत्रम् - षष्ठम्

पूर्णाङ्काः - ८०
उत्तीर्णाङ्काः - ३२

## समूहः 'क:'

१. एकेन वाक्येन उत्तरं दीयताम् १×८= ८

(क) अट्प्रत्याहारे हकारपाठस्य कानि प्रयोजनानि ?
(ख) यण् शब्देन के के वर्णा गृह्यन्ते ?
(ग) केषु अर्थेषु आङ् ङिद्वद् भवति ?
(घ) "स्तोः श्चुना श्चुः" इति सूत्रस्य स्तोरितिपदे कस्तावत् समासः ?
(ङ) "अर्थवद्." इति सूत्रे किं नाम अर्थवत्वम् ?
(च) "हल्ङ्याब्भ्यो दीर्घाद्." इत्यादिसूत्रे दीर्घात् पदं कस्य विशेषणम् ?
(छ) सर्वादयः कति सन्ति ?
(ज) "यस्येति च" इति सूत्रे यस्य इति पदे कीदृशो विग्रहः ?

## समूहः 'ख:'

अधोनिदर्शितप्रश्नानां सङ्क्षिप्तात्मकमुत्तरं दीयताम् ६×६ = ३६

२. हयवरडित्यत्र हकारोपदेशफलमभिधीयताम् ।

अथवा

"हलन्त्यम्" इति सूत्रस्यावृतः प्रयोजनमभिधीयताम् ।

३. "अचः परस्मिन्०" इति सूत्रस्याल्विध्यर्थत्वे फलप्रमाणे प्रतिपाद्येताम् ।

अथवा

"अदसो मात्" इति सूत्रे माद्ग्रहणस्य फलं निरूप्यताम् ।

४. "ङमो ह्रस्वादचि ङमुण्नित्यम्" इति सूत्रे नित्यग्रहणस्यौचित्यं निरूप्यताम् ।

अथवा

"इदुदुपधस्य चाप्रत्ययस्य" इत्यस्यार्थापनं सोहापोहं विधीयताम् ।

५. "कृत्तद्धितसमासाश्च" इत्यत्र समासग्रहणस्य प्रयोजनं प्रदर्श्यताम् ।

अथवा

"अनङ् सौ" इति सूत्रमर्थापयित्वा सोर्डा इति न्यासो युक्तो न वेति निर्णीयताम् ।

६. "अतोऽम्" इति सूत्रे 'अम्' इति छेदः, 'म्' इति वा निश्चीयताम् ।

## समूहः 'ग:'

अधोनिदर्शितप्रश्नयोर्व्याख्यानात्मकमुत्तरं विलिख्यताम् २×८ = १६

७. "उपदेश आद्योच्चारणम्" इत्यत्र स्थितस्योपदेशपदस्य भावघञन्तत्वं करणघञन्तत्वं वेति विव्रियताम् ।

अथवा

"पूर्वत्रासिद्धम्" इत्यस्याधिकारत्वं संसाध्य कर्यासिद्धत्वपक्षे दोषमुद्भाव्य शास्त्रासिद्धत्वपक्षः समर्थ्यताम् ।

८. "हलि सर्वेषाम्" इत्यत्र अशोऽनुवृत्तेरावश्यकत्वमस्ति न वेति विलिख्यताम् ।

१०

## समूहः 'घ'

निम्नाङ्कितप्रश्नयोर्विवेचनात्मकमुत्तरं दीयताम् २×१० = २०

९. सपदकृत्यं "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" इति सूत्रार्थं विलिख्य 'अधातुः' इति पर्युदासेनैवार्थवत्वे सिद्धे पुनरर्थवद्ग्रहणं किमर्थमिति ग्रन्थोक्तदिशा विविच्यताम्।

१०. "ङिति ह्रस्वश्च" इति सूत्रार्थं विमृश्य फलभेदप्रदर्शनपूर्वकं नित्यस्त्रीत्वं परिष्क्रियताम्।

अथवा

"अस्थिदधि०" इति सूत्रस्यार्थापनं विधाय प्राचोक्तं 'प्रियदध्ना' इति रूपं समीचीनं न वेति निर्णीयताम्।

***